स्वयमेवात्मनो ध्यानात्तदण्डमकरोद्द्विधा । ताभ्यां स शकलाभ्याञ्च दिवं भूमिञ्च निर्ममे इति” मनुनाऽण्डशकलाभ्यां तयोरुत्पत्तिप्रतिपादनात्तयोस्तथात्वम् ।

**आण्डज** पु० अण्डात् जायते जन—ड स्वार्थे अण् । १अण्डजे पक्षिसर्पादौ । २तच्छरीरे न० “तेषां खल्वेषां भूतानां त्रीण्येव वीजानि भवन्त्याण्डजं जीवजमुद्भिज्जम्” इति छा०उ० । “तेषां जीवाविष्टानां खल्वेषां पक्ष्यादीनां भूतानामेषामिति प्रत्यक्षनिर्देशान्न तु तेजःप्रभृतीनाम् । तस्मात्तेषां खल्वेषां भूतानां पशुपक्षिस्थावरादीनां त्रीण्येव नातिरिक्तानि वीजानि कारणानि भवन्ति । कानि तानीत्युच्यन्ते । अण्डजमण्डाज्जातम् अण्डजमेवाण्डजं पक्ष्यादि । पक्षिसर्पादिभ्यो हि पक्षिसर्पादयो जायमाना दृश्यन्ते । तेन पक्षी पक्षिणां वीजम् सर्पः सर्पाणां वीजम् । तथाऽन्यदप्यण्डाज्जातं तज्जातीयानां वीजमित्यर्थः ॥ नन्वण्डाज्जातमण्डजमुच्यतेऽतोऽण्डमेव वीजमिति युक्तं कथमाण्डजं वीजमुच्यते । सत्यमेवं स्याद्यदि त्वदिच्छातन्त्रा श्रुतिः स्यात्स्वतन्त्रा श्रुतिर्यत आहाण्डजाद्येव वीजं नाण्डादीति । दृश्यते चाण्डजाद्यभावे तज्जातीयसन्तत्यभावो नाण्डाद्यभावे । अतोऽण्डजादीन्येव वीजान्यण्डजादीनाम्” भा० ।

**आण्डायन** त्रि० अण्डेन निर्वृत्तः पक्षा० फक् । अण्डनिर्वृत्ते त्रि० । [ खण्डीर इत्येव साधुरित्यन्ये ।

**आण्डीर** पु० आण्डमस्त्यस्य ईरच् । वृषणयुक्ते इत्यपरे अ-

**आण्डीवत** पु० राजभेदे । तेन निर्वृत्तम् कण्वा० फिञ् । आण्डीवतायनिः तन्निर्वृत्ते त्रि० ।

**आत्** अव्य० अत—विण् । १अनन्तरमित्यर्थे । “आदस्य वातो अनुवाति शोचिः” ऋ० १,१४८,४ २अपिचेत्यर्थे “विश्वकर्मा विमना आद्विहायाधाता विधाता परमोत सन्दृक्” यजु० १७,२६, “आत् अपि च” वेददी० आ+स्वरूपे तकार । २आकाररूपे वर्णे पु० “आतश्चोपसर्गे कः” पाणिनिसूत्रम् ।

**आत** त्रि० आ+अत् अच् । सततगते प्रसृते । “पक्षोभिः श्रयमाणा उदातैः” यजु० २९,५, “आतैः प्रसृतैः” वेददी०

**आतक** त्रि० अत+ण्वुल् । १सततगन्तरि २सर्पभेदे पु० “बाहुकश्चाजघृङ्गश्च धूर्त्तकः प्रातरातकौ । कौरव्यकुलजास्त्वेते प्रयाता हव्यवाहनम्” भा० आ० ५७ अ० ।

**आतङ्क** पु० आ+तकि—घञ् । १रोगे, “दीर्घतीव्रामयग्रस्तं ब्राह्मणं गामथापि वा । दृष्ट्वा पथि निरातङ्कं कृत्वा वा ब्रह्महा शुचिः” या० २सन्तापे, “प्रश्नेन च विजानीयात् देशं कालं जातिसात्म्यमातङ्कं समुत्पत्तिं वेदनासमुच्छ्रायम्” इत्यादि सुश्रुतः । ३सन्देहे, ४मुरजशब्दे, ५भये च । “पुरुषायुषजीविन्यो निरातङ्का निरीतयः” रघुः ।

**आतञ्चन** न० आ+तन्च—ल्युट् । १वेगे, २प्रापणे, ३आप्यायने दुग्धादौ दध्यादिभावापादनाय ४अम्लद्रव्यप्रक्षेपे, (दम्बल देओया) ५निक्षेपे, ६उपद्रवे, ७द्रवद्रव्यप्रक्षेपेण कठिनद्रव्यस्य चूर्णने गलितस्वर्णादेर्द्रव्यान्तरयोगेण ८जारणे च । करणे ल्युट् । ९दधिसाधन द्रव्ये (दम्बल) । गोभ्योहि दशविधाः दुग्धादय उत्पद्यन्ते यथोक्तं श्रुतौ “प्रतिधुक् तस्यै शृतं तस्यै शरस्तस्यै दधि तस्यै मस्तु तस्या आतञ्चनं तस्यै नवनीतं तस्यै घृतं तस्या आमिक्षा तस्यै वाजिनम्” शत०ब्रा० । तत्र प्रतिधुक् सद्योदुग्धम् १शृतं पक्वं पयः२। शरः पक्वक्षीरस्योपरि सारभूतम्३ । घनीभूतं वस्तु दधि४ । दधिभवं सारभूतमुदकं मस्तु ५, । नवनीतघृते ६,७, प्रसिद्धे आतञ्चनं दधिभावकारणम् ८। आमिक्षा तप्ते पयसि दध्यानयने सति यत् घनीभूतं वस्तु जायते सामिक्षा९। द्रवात्मकं वाजिनम्१०” मा० “यत्पूर्व्वैद्युर्दुग्धं हविरातञ्चनं तत्कुर्वीत कात्या० । [स संसदा” रघुः ।

**आतत** त्रि० आ+तन—क्त । विस्तृते “आततज्यमकरोत्

**आततायिन्** त्रि० आततेन विस्तीर्णेन शस्त्रादिना अयितुं शीलमस्य अय—णिनि । बधोद्यते । विषयभेदेन आततायिबधे दोषादोषौ” प्रा०वि० उक्तौ यथा वृह०“नाततायिबधे हन्ता किल्विषं प्राप्नुयात् क्वचित् । विनाशार्थिनमायान्तं घातयन्नापराप्नुयात्” । किल्विषाभावःप्रायश्चित्तनिषेधार्थः अपराधाभावो दण्डनिषेधार्थः । यतः “सर्वत आत्मानं गोपायीतेति” श्रुतिमूलमिदम् अतः पलायनादिनापि रक्षणाभावे इदं बोद्धव्यम् । कात्यायनः । “आततायिनमायान्तमपि वेदान्तगं रणे । जिघांसन्तं जिघांसीयान्न तेन ब्रह्महा भवेत्”जिघांसी सन् इयाद्गच्छेदित्यर्थः । देवलः । “उद्यम्य शस्त्रमायान्तं भ्रूणमप्याततायिनम् । निहत्य भ्रूणहा न स्यादहत्वा भ्रूणहा भवेत्” । भ्रूणोब्राह्मणविशेषः । दोषदर्शनं नियमार्थम् । मनुविष्णू । “गुरुं वा बालवृद्धौ वा ब्राह्मणं वा बहुश्रुतम् । आततायिनमायान्तं हन्यादेवाविचारयन्”एवकारोनियमार्थः । तथा “नाततायिबधे दोषो हन्तुर्भवति कश्चन । प्रकाशं वाऽप्रकाशं वा मन्युस्तन्मन्युमृच्छति” । यस्माद्धन्तृमन्युर्हन्यमानमन्युं नाशयति न पुनः पुरुषोहन्ति हन्यते वेति हननविधेरपवादः । आततायिन-